

# શ્રી હનુમદષ્ટકમ્-શ્રીરઘુરાજપદાબ્જનિકેતન

https://www.chalisa.online

|| શ્રી હનુમદષ્ટકમ્ ||

શ્રીરઘુરાજપદાબ્જનિકેતન પંકજલોચન મંગળરાશે
ચંડમહાભુજદંડ સુરારિવિખંડનપંડિત પાહિ દયાળો ।
પાતકિનં ચ સમુધ્દર માં મહતાં હિ સતામપિ માનમુદારં
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 1 ॥
સંસૃતિતાપમહાનલદગ્ધતનૂરુહમર્મતનોરતિવેલં
પુત્રધનસ્વજનાત્મગૃહાદિષુ સક્તમતેરતિકિલ્બિષમૂર્તેઃ ।
કેનચિદપ્યમલેન પુરાકૃતપુણ્યસુપુંજલવેન વિભો વૈ
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 2 ॥
સંસૃતિકૂપમનલ્પમઘોરનિદાઘનિદાનમજસ્રમશેષં
પ્રાપ્ય સુદુઃખસહસ્રભુજંગવિષૈકસમાકુલસર્વતનોર્મે ।
ઘોરમહાકૃપણાપદમેવ ગતસ્ય હરે પતિતસ્ય ભવાબ્ધૌ
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 3 ॥
સંસૃતિસિંધુવિશાલકરાલમહાબલકાલઝષગ્રસનાર્ત
વ્યગ્રસમગ્રધિયં કૃપણં ચ મહામદનક્રસુચક્રહૃતાસુમ્ ।
કાલમહારસનોર્મિનિપીડિતમુધ્દર દીનમનન્યગતિં માં
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 4 ॥
સંસૃતિઘોરમહાગહને ચરતો મણિરંજિતપુણ્યસુમૂર્તેઃ
મન્મથભીકરઘોરમહોગ્રમૃગપ્રવરાર્દિતગાત્રસુસંધેઃ ।
મત્સરતાપવિશેષનિપીડિતબાહ્યમતેશ્ચ કથં ચિદમેયં
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 5 ॥
સંસૃતિવૃક્ષમનેકશતાઘનિદાનમનંતવિકર્મસુશાખં
દુઃખફલં કરણાદિપલાશમનંગસુપુષ્પમચિંત્યસુમૂલમ્ ।
તં હ્યધિરુહ્ય હરે પતિતં શરણાગતમેવ વિમોચય મૂઢં
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 6 ॥
સંસૃતિપન્નગવક્ત્રભયંકરદંષ્ટ્રમહાવિષદગ્ધશરીરં
પ્રાણવિનિર્ગમભીતિસમાકુલમંદમનાથમતીવ વિષણ્ણમ્ ।
મોહમહાકુહરે પતિતં દયયોધ્દર મામજિતેંદ્રિયકામં
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 7 ॥
ઇંદ્રિયનામકચોરગણૈર્હૃતતત્ત્વવિવેકમહાધનરાશિં
સંસૃતિજાલનિપાતિતમેવ મહાબલિભિશ્ચ વિખંડિતકાયમ્ ।
ત્વત્પદપદ્મમનુત્તમમાશ્રિતમાશુ કપીશ્વર પાહિ કૃપાળો
ત્વાં ભજતો મમ દેહિ દયાધન હે હનુમન્ સ્વપદાંબુજદાસ્યમ્ ॥ 8 ॥
બ્રહ્મમરુદ્ગણરુદ્રમહેંદ્રકિરીટસુકોટિલસત્પદપીઠં
દાશરથિં જપતિ ક્ષિતિમંડલ એષ નિધાય સદૈવ હૃદબ્જે ।
તસ્ય હનૂમત એવ શિવંકરમષ્ટકમેતદનિષ્ટહરં વૈ
યઃ સતતં હિ પઠેત્સ નરો લભતેઽચ્યુતરામપદાબ્જનિવાસમ્ ॥ 9 ॥
ઇતિ શ્રી મધુસૂદનાશ્રમ શિષ્યાઽચ્યુતવિરચિતં શ્રીમદ્દનુમદષ્ટકમ્ ।

|| https://www.chalisa.online ||